# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा –शास्त्रीद्वितीयवर्षम्** (SEM-3) | **प्रश्नपत्रम् – ६** | **गुणाः – ७०** |
| **विषयः – फलितज्यौतिषम्** | (C.C.- 2.3.6. Old ) | |
| **दिनाङ्कः – १०/१२/२०१८** | **बृहज्जातकम् ।** | **समयः –०२.०० तः ०५.००** |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत ।** **( १० )**

(१) कालाङ्गानि वराङ्गमाननमुरो हृत्क्रोडवासोभृतो ।
वस्तिर्व्यञ्जनमूरुजानुयुगले–जङ्घेस्ततोङ्घ्रिद्वयम् ॥
मेषाश्विप्रथमानवर्क्षचरणाश्चक्रस्थिता राशयः
राशिक्षेत्रगृहर्क्षभानिभवनं चैकार्थसम्प्रत्ययः ॥

(२) मत्स्यौ घटी नृमिथुनं सगदं सवीणं
चापी नरोऽश्वजघनो मकरो मृगास्यः ।
तौली सशस्यदहना प्लवगा च कन्या
शेषाः स्वनामसदृशाः खचराश्चसर्वे ॥

(३) होरा स्वामिगुरुज्ञवीक्षितयुता नान्यैश्च वीर्योत्कटा ।
केन्द्रस्था द्विपदादयोऽह्निनिशि च प्राप्ते च सन्ध्याद्वये ॥
पूर्वार्द्धे विषयादयः कृतगुणा मानं प्रतीपं च तद्
दुश्चिक्यं सहजं तपश्चनवमं त्र्याद्यं त्रिकोणं च तत् ॥

**प्रश्नः २ अधोलिखितयोः प्रश्नयोः कश्यचिदेकस्योपरि निबन्धं निबन्धयत ।** **( १० )**

(१) राशिप्रभेदाध्यायस्य सारांशं लिखतु । (२) वियोनिजन्माध्यायः ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत ।** **( १० )**

(१) लग्ननवांशपतुल्यतनुः स्याद्विच्ययुतग्रहतुल्यतनुर्वा ।
चन्द्रसमेतनवांशपवर्णः कादिविलग्नविभक्तभगात्रः ॥

(२) समनुपतिता यस्मिन्भागे त्रयः सुबधा ग्रहा ।
भवति नियमात्तस्यावाप्तिः शुभेष्वशुभेषु वा ॥
व्रणकृदशुभः षष्ठे देहे तनोर्भसमाश्रिते
तिलकमशकृद्दृष्टः सौम्येयुतश्च सलक्ष्मवान् ॥

(३) अशुभसहिते ग्रस्ते चन्द्रे कुजे निधनश्रिते जननिसुतयोर्मृत्युर्लग्ने रवौ तु सशस्त्रजः ।

उदयति रवौ शीतांशौ वा त्रिकोणविनाशगै-र्निधनमशुभैर्वीर्योपेतैः शुभैर्नयुतेक्षिते ॥

**प्रश्नः ४ अधोलिखितयोः प्रश्नयोः कश्यचिदेकस्योपरि निबन्धं निबन्धयत ।** **( १० )**

(१) सूतिकाशयनज्ञानम् (२) अरिष्टाध्यायस्य सारांशः ।

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत ।** **( १० )**

(१) जीवांशे द्विजविबुधाकरादिधर्मैः काव्यांशे मणिरजतादिगोमहिष्यैः ।
सौरांशे श्रमवधमारनीचशिल्पैः कर्मेशाध्युषितनवांशकर्मसिद्धिः ॥

(२) यमे कुम्भेर्केऽजे गवि शशिनितैरेव तनुगै-र्नृयुक्सिंहालिस्थैः शशिजगुरुवक्रैनृपतयः ।
यमेन्दू तुङ्गोऽङ्गे सवितृशशिजौ षष्ठभवने तुलाजेन्दुक्षेत्रैः ससितकुजजीवैश्चनरपौ ॥

(३) नवदिग्वसवस्त्रिकाग्निवेदैर्गुणिता द्वित्रिचतुर्विकल्पजाः स्युः ।
यवनैस्त्रिगुणा हि षट्शती सा कथिता विस्तरतोऽत्र तत्समासतः ॥

**प्रश्नः ६ अधोलिखितयोः प्रश्नयोः कश्यचिदेकस्योपरि निबन्धं निबन्धयत ।** **( १० )**

(१) कर्माजीवाध्यायः । (२) नाभसयोगाध्यायः ।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोनिर्दिष्टेषु दशानाम् अतिलघूत्तरं यच्छत ।** **( १० )**

(१) भौमस्य स्थानं किम् ?

(२) स्त्रिसंज्ञकग्रहाः के ?

(३) अङ्गिरा कस्य ग्रहस्य पर्यायवाचिशब्दः अस्ति ?

(४) द्विस्वभावराशयः के ?

(५) गर्भान्धः कदा भवति ?

(६) अङ्गभङ्गः कस्य ग्रहस्य दशायां भवति ?

(७) शनिः कानि स्थानानि पूर्णदृष्ट्या अवलोकयति ?

(८) भौमस्य मित्रग्रहः कः ?

(९) दशमस्थाने स्थित-सूर्यभौमयोः कस्यां दिशायां बलिं भवति ?

(१०) चन्द्रतः कस्मिन् स्थाने पापग्रहे सति मातरं कष्टकरं भवति ?

(११) लग्ने द्वितीयद्रेष्काणोदितेसति कस्याङ्गस्य न्यासः क्रियते ?

(१२) शनिक्षेत्रगतोभानुर्भानुक्षेत्रे गतो शनिः कस्मिन् वर्षे मृत्युः भवति ?

(१३) अधियोगस्य प्रकाराः कति ?

(१४) केन्द्रस्थितराहुं पापग्रहः पश्यति चेत् जातकस्य कदा मृत्युः भवति ?

(१५) यमः कस्य राशेः पर्यायवाची शब्दः अस्ति ?

--००--